# Shri Ganesha Manasapuja 2

# શ્રીગણેશમાનસપૂજા ૨

## Document Information

Text title : gaNeshamAnasapUjA 2

File name : gaNeshamAnasapUjA2.itx

Category : pUjA, ganesha

Location : doc_ganesha

Author : Traditional

Transliterated by : P. Jayaraman vyshupjr at gmail.com

Proofread by : P. Jayaraman vyshupjr at gmail.com, NA

Latest update : July 25, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીગણેશમાનસપૂજા ૨

રક્તામ્ભોધિસ્થપોતોલ્લસદરુણસરોજાધિરૂઢં ત્રિનેત્રં
પાશં ચૈવાઙ્કુશં વૈ વરદમભયદં બાહુભિર્ધારયન્તમ્ ।
શક્ત્યા યુક્તં ગજાસ્યં પૃથુતરજઠરં નાગયજ્ઞોપવીતં
દેવં ચન્દ્રાર્ધચૂડં સકલભયહરં વિઘ્નરાજં નમામિ ॥ ૧॥

નાનારત્નવિચિત્રકં રમણિકં સિંહાસનં કલ્પિતં
સ્નાનં જાહ્નવિવારિણા ગણપતે પિતામ્બરં ગૃહ્યતામ્ ।
કણ્ઠે મૌક્તિકમાલિકા શ્રુતિયુગે દ્વે ધારિતે કુણ્ડલે
નાનારત્નવિરાજિતો રવિવિભાયુક્તઃ કિરીટઃ શિરે ॥ ૨॥

ભાલે ચર્ચિતકેશરં મૃગમદામોદાઙ્કિતં ચન્દનં
નાનાવૃક્ષસમુદ્ભતં સુકુસુમં મન્દારદૂર્વાશમીઃ ।
ગુગ્ગૂલ્લોદ્ભવધૂપકં વિરચિતં દીપં ત્વદગ્રે સ્થિતં
ભક્ષ્યં મોદકસંયુતં ગણપતે ક્ષીરોદનં ગૃહ્યતામ્ ॥ ૩॥

તામ્બૂલં મનસા મયા વિરચિતં જમ્બૂફલં દક્ષિણાં
સાષ્ટાઙ્ગં પ્રણતોઽસ્મિ તે મમ કૃતાં પૂજા ગૃહાણ પ્રભો ।
મે કામઃ સતતં તવાર્ચનવિધૌ બુદ્ધિસ્તવાલિઙ્ગને
સ્વેચ્છા તે મુખદર્શને ગણપતે ભક્તિસ્તુ પાદામ્બુજે ॥ ૪॥

માતા ગણેશશ્ચ પિતા ગણેશો
ભ્રાતા ગણેશશ્ચ સખા ગણેશઃ ।
વિદ્યા ગણેશો દ્રવિણં ગણેશઃ
સ્વામી ગણેશઃ શરણં ગણેશઃ ॥ ૫॥

ઇતો ગણેશઃ પરતો ગણેશઃ
યતો યતો યામિ તતો ગણેશઃ ।
ગણેશદેવાદપરં ન કિઞ્ચિત્
તસ્માત્ ગણેશં શરણં પ્રપદ્યે ॥ ૬॥

બુદ્ધ્યા કૃતં વચનજં મનસેન્દ્રિયૈર્યદ્
    દેહેન જાગૃતિસુષુપ્તિજસ્વપ્નજં યત્ ।
યદ્યચ્ચ કર્મ હિ મયા સકલં પરસ્મૈ
    ગજાનનાય વરદાય સમર્પયે તત્ ॥ ૭॥

દેહેન વાચા મનસા કૃતાન્ મે
    સાંસર્ગિકાન્ જાગૃતસ્વપ્નજાતાન્ ।
સૌષુપ્તતૌર્યાન્ સકલાપરાધાન્
    ક્ષમસ્વ હેરમ્બ દયાનિધે ત્વમ્ ॥ ૮॥

દીનાનાથદયાનિધે સુરગણૈઃ સંસેવ્યમાન દ્વિજ -
    બ્રહ્મેશાનમહેન્દ્રશેષગિરિજાગન્ધર્વસિદ્ધૈઃ સ્તુત ।
સર્વારિષ્ટનિવારણૈકનિપુણ ત્રૈલોક્યનાથ પ્રભો
    ભક્તિં મે સફલાં કુરુષ્વ સકલાન્ ક્ષાન્ત્વાપરાધાન્ મમ ॥ ૯॥

Encoded and proofread by P. Jayaraman vyshupjr at gmail.com, NA

*Shri Ganesha Manasapuja 2*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*